| न्यायनामानि | तल्लक्षणानि | तत्प्रमाणानि |
| --- | --- | --- |
| सन्दंशप्रापितन्यायः २६। | सन्दंशः सँड़াशी यस्य प्रसिद्धिः। यथा तेनोभयपार्श्वधारणेन वस्तुप्राप्तिस्तथा। तथा हि।<br>अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।<br>पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः॥<br>इत्यत्र काश्याः पुरत्रयपाठानन्तरं पुरत्रयपाठपूर्व्वञ्च पठितत्वेन तदितरषट्पुराणि काशीप्रापकाणि। २६। | काशीखण्डटीका २६। |
| सर्व्वापेक्षान्यायः ३०। | बहुषु निमन्त्रितेषु एकस्मिन्नागतेऽपि भोज्यं न दीयते सर्व्वानपेक्षते तद्वत्। ३०। | भाष्यरत्नप्रभा ३०। |
| सूचीकटाहन्यायः ३१। | स्वल्पश्रमसाध्यसूचीनिर्म्माणानन्तरं बहुश्रमसाध्यकटाहनिर्म्माणम्। ३१। | कलापव्याकरणानन्दलहरीटीकादयः ३१। |
| स्थविरलगुड़न्यायः। ३२। | वृद्धहस्तस्थयष्टिः सहसा लक्ष्यस्थाने कचित् पतति कचिन्न पतति तद्वत्। ३२। | कलापटीका। ३२। |

(यदि च न्यायवैशेषिकसांख्यपातञ्जलप्रभृत्यास्तिकदर्शनानां साक्षात्पारम्पर्य्येणैकमात्रानन्तविश्वब्रह्माण्डस्योदयस्थितिलयकारणं एकोऽद्वितीयः सर्व्वपुरुषार्थस्वरूपः सनातनपुरुषः सर्व्वशक्तिमान् परमेश्वरः परमात्मैव प्रतिपाद्यः तत्रापि चार्व्वाकादिविपक्षमतनिराकरणेन जगत्कारणतयेश्वरस्य संस्थापनात् न्यायदर्शनस्यैव सर्व्वप्राधान्यसिद्धिः। आत्मतत्त्वज्ञानोत्पादनाय साक्षादुपयोगितया समस्तश्रुतिमीमांसिततया च पुराणादिशास्त्रेषु वेदान्तस्य भूयसीप्रशंसादर्शनाच्च तस्यैव दर्शनस्य मुख्यत्वमायाति चेत् न अतीवसूक्ष्मतमब्रह्मतत्त्वनिरूपकजगत्पूज्यवेदान्तशास्त्रे कदापि कस्यापि विषयभोगकलुषितबुद्धिपरिमार्ज्जकन्यायदर्शनबोधादृते प्रवेशानधिकारात्। अतो नितरामेव सर्व्वेभ्योऽस्यैव गौरवमभ्युपजग्मिरे तार्किकाः। वस्तुतस्तु सर्व्वेष्वास्तिकदर्शनेषु न्यायदर्शनमेव सर्व्वोच्चमयसिंहासनमारोढुमर्हतीति सर्व्वेषां प्रेक्षावतां परामर्शः। विशेषतः चार्व्वाकादिदुष्टमतखण्डनपूर्व्वक मोक्षस्वरूपस्थापनायेश्वरसत्तासंस्थापनाय चैकमात्रन्यायदर्शनमेवालं नत्वन्यत्। एतच्च सत्यं नवेति प्रतिपादनाय श्रीमन्माधवाचार्य्यसङ्कलित सर्व्वदर्शनसारसंग्रहग्रन्थान्तर्गताक्षपाददर्शनशास्त्रादेव समुद्धृत्य दर्शयिष्यामः। तत्र प्रथमतः ईश्वरसंस्थापनं यथा,—

“नन्वीश्वरसद्भावे किं प्रमाणं प्रत्यक्षमनुमानमागमो वा न तावदत्र प्रत्यक्षं क्रमते रूपादिरहितत्वेनातीन्द्रियत्वात् नाप्यनुमानं तद्व्याप्तिलिङ्गाभावात् नागमः विकल्पासहत्वात् किं नित्योऽवगमयत्यनित्यो वा। आद्ये अपसिद्धान्तापातः द्वितीये परस्पराश्रयापातः। उपमानादिकमशक्यशङ्कं नियतविषयत्वात्। तस्मादीश्वरः शशविषाणायते इति चेत्तदेतन्न चतुरचेतसां चेतसि चमत्कारमाविष्करोति। विवादास्पदं नगसागरादिकं सकर्तृकं कार्य्यत्वात् कुम्भवत्। न चायमसिद्धो हेतुः सावयवत्वेन तस्य सुसाधनत्वात्। ननु किमिदं सावयवत्वं अवयवसंयोगित्वं अवयवसमवायित्वं वा नाद्यः गगनादौ व्यभिचारात् न द्वितीयः तन्तुत्वादावनैकान्त्यात्। तस्मादनुपपन्नमिति चेन्मैवं वादीः समवेतद्रव्यत्वं सावयवत्वमिति निरुक्तेर्वक्तुं शक्यत्वात्। अवान्तरमहत्त्वेन वा कार्य्यत्वानुमानस्य सुकरत्वात्। नापि विरुद्धो हेतुः साध्यविपर्य्ययव्याप्तेरभावात् नाप्यनैकान्तिकः पक्षादन्यत्र वृत्तेरदर्शनात् नापि कालात्ययोपदिष्टः बाधकानुपलम्भात् नापि सत्प्रतिपक्षः प्रतिभटादर्शनात्। ननु नगादिकमकर्तृकं शरीराजन्यत्वात् गगनवदिति चेन्नैतत् परीक्षाक्षममीक्ष्यते नहि कठोरकण्ठीरवस्य कुरङ्गशावः प्रतिभटो भवति अजन्यत्वस्यैव समर्थतया शरीरविशेषणवैयर्थ्यात्। तर्ह्यजन्यत्वमेव साधनमिति चेन्नासिद्धेः नापि सोपाधिकत्वशङ्काकलङ्काङ्कुरः सम्भवी अनुकूलतर्कसम्भवात् यद्ययमकर्तृकः स्यात् कार्य्यमपि न स्यादिह जगति नास्त्येव तत्कार्य्यं नाम यत्कारकचक्रमवधीर्य्यात्मानमासादयेदित्येतदविवादम्। तच्च सर्व्वं कर्तृविशेषोपहितमर्य्यादं कर्तृत्वं चेतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वलक्षणं ज्ञानचिकीर्षाप्रयत्नाधारत्वम्। एवञ्च कर्तृव्यावृत्तेस्तदुपहितसमस्तकारकव्यावृत्तावकारणककार्य्योत्पादप्रसङ्ग इति स्थूलः प्रमादः। तथा निरटङ्कि शङ्करकिङ्करेण।

“अनुकूलेन तर्केण सनाथे सति साधने।
साध्यव्यापकताभङ्गात् पक्षे नोपाधिसम्भव” इति।

यदीश्वरः कर्त्ता स्यात्तर्हि शरीरी स्यादित्यादिप्रतिकूलतर्कजातं जागर्त्तीति चेदीश्वरसिद्ध्यसिद्धिभ्यां व्याघातात्। तदुदितमुदयनेन।

“आगमादेः प्रमाणत्वे बाधनादनिषेधनम्।
आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धतेति॥”

न च विशेषविरोधः शक्यशङ्कः ज्ञातत्वाज्ञातत्वविकल्पपराहतः स्यात्। तदेतत् परमेश्वरस्य जगन्निर्म्माणे प्रवृत्तिः किमर्था स्वार्था परार्था वा आद्येऽपीष्टप्राप्त्यर्था अनिष्टपरिहारार्था वा नाद्यः अवाप्तसकलकामस्य तदनुपपत्तेः अतएव न द्वितीयः। द्वितीये प्रवृत्त्यनुपपत्तिः कः खलु परार्थं प्रवर्त्तमानं प्रेक्षावानित्याचक्षीत। अथ करुणया प्रवृत्त्युपपत्तिरित्याचक्षीत कश्चित्तं प्रत्याचक्षीत तर्हि सर्व्वान् प्राणिनः सुखिन एव सृजेदीश्वरः न दुःखशबलान् करुणाविरोधात् स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा हि कारुण्यं तस्मादीश्वरस्य जगत्सर्जनं न युज्यते। तदुक्तं भट्टाचार्य्यैः—

“प्रयोजनमनुद्दिश्य न मन्दो हि प्रवर्त्तते।
जगच्चासृजतस्तस्य किं नाम न कृतं भवेदिति।”

नास्तिकशिरोमणे! तावदीर्ष्याकषायिते चक्षुषी निमील्य परिभावयतु भवान् करुणया प्रवृत्तिरस्त्येव न च निसर्गतः सुखमयसर्गप्रसङ्गः सृज्यप्राणिकृतसुकृतदुष्कृतपरिपाकविशेषाद्वैषम्योपपत्तेः न च स्वातन्त्र्यभङ्गः शङ्कनीयः स्वाङ्गं स्वव्यवधायकं न भवतीति न्यायेन प्रत्युत तन्निर्व्वाहात् एक एव रुद्रो न द्वितीयाय तस्थे इत्यादिरागमस्तत्र प्रमाणम्। यद्येवं तर्हि परस्पराश्रयव्याधिं समाधत्स्वेति चेत् तस्यानुत्थानात् किमुत्पत्तौ परस्पराश्रयः शङ्क्यते ज्ञप्तौ वा। नाद्यः आगमस्येश्वराधीनोत्पत्तिकत्वेऽपि परमेश्वरस्य नित्यत्वेनोत्पत्तेरनुपपत्तेः नापि ज्ञप्तौ परमेश्वरस्य आगमाधीनज्ञप्तिकत्वेऽपि तस्यान्यतोऽवगमात् नापि तदनित्यत्वज्ञप्तौ आगमानित्यत्वस्य तीव्रादिधर्म्मोपेतत्वादिना सुगमत्वात्।”

द्वितीये मोक्षस्वरूपसंस्थापनं यथा,—

“ननु दुःखात्यन्तोच्छेदोऽपवर्ग इत्येतदद्यापि कफोणिगुडायितं वर्त्तते तत्कथं सिद्धवत्कृत्य व्यवह्रियत इति चेन्मैवं सर्व्वेषां मोक्षवादिनामपवर्गदशायामात्यन्तिकी दुःखनिवृत्तिरस्तीत्यस्यार्थस्य सर्व्वतन्त्रसिद्धान्तसिद्धतया घण्टापथत्वात् नह्यप्रवृत्तस्य दुःखं प्रत्यापद्यते इति कश्चित् प्रपद्यते तथा हि आत्मोच्छेदो मोक्ष इति माध्यमिकमते दुःखोच्छेदोऽस्तीत्येतावतावदविवा-